# Shri Shiva-PadadikeshAnta Stuti

# શ્રીશિવપાદાદિકેશાન્તસ્તુતિઃ

## Document Information

Text title : shivapAdAdikeshAntastutiH

File name : shivapAdAdikeshAntastutiH.itx

Category : shiva, shankarAchArya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : Rajnarayanan C K krajnara at gmail.com

Proofread by : Rajnarayanan C K, PSA Easwaran

Description-comments : Brihatstotraratnakara 1927 Madras, page 144 to 152

Latest update : January 25, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2024

*sanskritdocuments.org*

# Shri Shiva-PadadikeshAnta Stuti

# શ્રીશિવપાદાદિકેશાન્તસ્તુતિઃ

કલ્યાણં વો વિધત્તાં કટકતટલસત્કલ્પવાટીનિકુઞ્જ-
ક્રીડાસંસક્તવિદ્યાધરનિવહવધૂગીતરુદ્રાપદાનઃ ।
તારૈર્હેરમ્બનાદૈસ્તરલિતનિનદત્તારકારાતિકેકી-
કૈલાસશ્શર્વનિર્વૃત્યભિજનકપદસ્સર્વદા પર્વતેન્દ્રઃ ॥ ૧॥

યસ્ય પ્રાહુસ્સ્વરૂપં સકલદિવિષદાં સારસર્વસ્વયોગં
યત્યેષુશ્શાર્ઙ્ગધન્વા સમજનિ જગતાં રક્ષણે જાગરૂકઃ ।
મૌર્વી દર્વીકરાણામપિ ચ પરિબૃઢઃ પૂસ્ત્રયી સા ચ લક્ષ્યં
સોઽવ્યાદવ્યાજમસ્માનશિવભિદનિશં નાકિનાં શ્રીપિનાકઃ ॥ ૨॥

આતઙ્કાવેગહારી સકલદિવિષદામઙ્ઘ્રિપદ્માશ્રયાણાં
માતઙ્ગાદ્યુગ્રદૈત્યપ્રકરતનુગલદ્રક્તધારાક્તધારઃ ।
ક્રૂરઃ સૂરાયુતાનામપિ ચ પરિભવં સ્વીયભાસા વિતન્વન્
ઘોરાકારઃ કુઠારો દૃઢતરદુરિતાખ્યાટવીં પાટયેન્નઃ ॥ ૩॥

કાલારાતેઃ કરાગ્રે કૃતવસતિરુરશ્શાણશાતો રિપૂણાં
કાલે કાલે કુલાદ્રિ પ્રવરતનયયા કલ્પિતસ્નેહલેપઃ ।
પાયાન્નઃ પાવકાર્ચિઃપ્રસરસખમુખઃ પાપહન્તા નિતાન્તં
શૂલશ્શ્રીપાદસેવાભજનપરહૃદાં પાલનૈકાન્તશીલઃ ॥ ૪॥ ભજનરસજુષાં

દેવસ્યાઙ્કાશ્રયાયાઃ કુલગિરિદુહિતુર્નેત્રકોણપ્રચાર-
પ્રસ્તારાનત્યુદારાન્ પિપઠિષુરિવ યો નિત્યમત્યાદરેણ ।
આધત્તે ભઙ્ગિતુઙ્ગૈરનિશમવયવૈરન્તરઙ્ગં સમોદં
સોમાપીડસ્ય સોઽયં પ્રદિશતુ કુશલં પાણિરઙ્ગઃ કુરઙ્ગઃ ॥ ૫॥

કણ્ઠપ્રાન્તાવસજ્જત્કનકમયમહાઘણ્ટિકાઘોરઘોષૈઃ
કણ્ઠારાવૈરકુણ્ઠૈરપિ ભરિતજગચ્ચક્રવાલાન્તરાલઃ ।
ચણ્ડઃ પ્રોદ્દણ્ડશૃઙ્ગઃ કકુદકબલિતોત્તુઙ્ગકૈલાસશૃઙ્ગઃ
કણ્ઠે કાલસ્ય વાહઃ શમયતુ દુરિતં શાશ્વતઃ શાક્કરેન્દ્રઃ ॥ ૬॥ શમયતિ શમલં

નિર્યદ્દાનામ્બુધારાપરિમલતરલીભૂતલોલમ્બપાલી
ઝઙ્ગારૈઃ શઙ્કરાદ્રેઃ શિખરશતદરીઃ પૂરયન્ભૂરિઘોષૈઃ ।
શાર્વસ્સૌવર્ણશૈલપ્રતિમપૃથુવપુસ્સર્વવિઘ્નોપહર્તા
શર્વાણ્યાઃ પૂર્વસૂનુસ્સ ભવતુ ભવતાં સ્વસ્તિદો હસ્તિવક્ત્રઃ ॥ ૭॥

યઃ પુણ્યૈર્દેવતાનાં સમજનિ શિવયોશ્શ્લાઘ્યવીરૈકમત્યાત્  var  વીર્યૈકમત્યાત્]
યન્નામ્નિ શ્રૂયમાણે દિતિજભટઘટા ભીતિભારં ભજન્તે ।
ભૂયાત્સોઽયં વિભૂત્યૈ નિશિતશરશિખાપાટિતક્રૌઞ્ચશૈલ-
સ્સંસારાગાધકૂપોદરપતિતસમુત્તારકસ્તારકારિઃ ॥ ૮॥

આરૂઢપ્રૌઢવેગપ્રવિજિતપવનં તુઙ્ગતુઙ્ગં તુરઙ્ગં
ચેલં નીલં વસાનઃ કરતલવિલસત્કાણ્ડકોદણ્ડદણ્ડઃ ।
રાગદ્વેષાદિનાનાવિધમૃગપટલીભીતિકૃદ્ભૂતભર્તા
કુર્વન્નાખેટલીલાં પરિલસતુ મનઃ કાનને મામકીને ॥ ૯॥

અમ્ભોજાભ્યાં ચ રમ્ભારથચરણલતાદ્વન્દ્વકુમ્ભીન્દ્રકુમ્ભૈ-
ર્બિમ્બેનેન્દોશ્ચ કમ્બોરુપરિ વિલસતા વિદ્રુમેણોત્પલાભ્યામ્ ।
અમ્ભોદેનાપિ સમ્પાદિતમુપજનિતાડમ્બરં શમ્બરારેઃ
શમ્ભોસ્સમ્ભોગયોગ્યં કિમપિ ધનમિદં સમ્ભવેત્સમ્પદે નઃ ॥ ૧૦॥

વેણીસૌભાગ્યવિસ્માપિતતપનસુતાચારુવેણીવિલાસા-
ન્વાણીનિર્ધૂતવાણીકરતલવિધૃતોદારવીણાવિરાવાન્ ।
એણીનેત્રાન્તભઙ્ગીનિરસનનિપુણાપાઙ્ગકોણાનુપાસે
શોણાન્ પ્રાણાનુદૂઢપ્રતિનવસુષમાકન્દલાનિન્દુમૌલેઃ ॥ ૧૧॥

નૃત્તારમ્ભેષુ હસ્તાહતમુરજધિમિદ્ધિંકૃતૈરત્યુદારૈ-
શ્ચિત્તાનન્દં વિધત્તે સદસિ ભગવતસ્સન્તતં યસ્સ નન્દી ।
ચણ્ડીશાદ્યાસ્તથાન્યે ચતુરગુણગણપ્રાણિતસ્વામિસત્કા-
રોત્કર્ષોદ્યત્પ્રતાપાઃ પ્રમથપરિવૃઢાસ્સન્તુ સન્તોષિણો નઃ ॥ ૧૨॥

var  રોત્કર્ષોદ્યત્પ્રસાદાઃ પ્રમથપરિવૃઢાઃ પાન્તુ

મુક્તામાણિક્યજાલૈઃ પરિકલિતમહાસાલમાલોકનીયં
પ્રત્યુપ્તાનર્ઘરત્નૈર્દિશિ ભવનૈઃ કલ્પિતૈર્દિક્પતીનામ્ ।
ઉદ્યાનૈરદ્રિકન્યાપરિજનવનિતામાનનીયૈઃ પરીતં
હૃદ્યં સ્તુત્યં સુરાણાં મમ ભુવનપતેર્ધામ સોમાર્ધમૌલેઃ ॥ ૧૩॥

var હૃદ્યં હૃદ્યસ્તુ નિત્યં

સ્તમ્ભૈર્જમ્ભારિરત્નપ્રવરવિરચિતૈસ્સમ્ભૃતોપાન્તભાગં
શુમ્ભત્સોપાનમાર્ગં શુચિમણિનિચયૈર્ગુમ્ભિતાનલ્પશિલ્પમ્ ।
કુમ્ભૈસ્સમ્પૂર્ણશોભં શિરસિ સુઘટિતૈઃ શાતકુમ્ભૈરપઙ્કૈ-
શ્શમ્ભોસ્સમ્ભાવનીયં સકલમુનિજનૈસ્સર્વદા સુપ્રસન્નઃ ॥ ૧૪॥ જનૈઃ સ્વસ્તિદં સ્યાત્સદો નઃ

ન્યસ્તો મધ્યે સભાયાઃ પરિસરવિલસત્પાદપીઠાભિરામો
હૃદ્યઃ પાદૈશ્ચતુર્ભિઃ કનકમણિમયૈરુચ્ચકૈરુજ્જ્વલાત્મા ।
વાસોરત્નેન કેનાપ્યધિકમૃદુકરેણાસ્તૃતો વિસ્મૃતશ્રીઃ- var તરેણાસ્તૃતો
પીઠઃ પીડાધરં નઃ શમયતુ શિવયોસ્સ્વૈરસંવાસયોગ્યઃ ॥ ૧૫॥ પીડાભરં

આસીનસ્યાધિપીઠં ત્રિજગદધિપતેરઙ્ઘ્રિપીઠાનુષક્તૌ
પાથોજાભોગભાજૌ પરિમૃદુલતલોલ્લાસિપદ્માભિલેખૌ ।
પાતાં પાદાવુભૌ તૌ નમદમરકિરીટોલ્લસચ્ચારુહીર્-
શ્રેણીશોણાયમાનોન્નતનખદશકોદ્ભાસમાનૌ સમાનૌ ॥ ૧૬॥

યન્નાદો વેદવાચાં નિગદતિ નિખિલં લક્ષણં પક્ષિકેતુ-
ર્લક્ષ્મીસમ્ભોગસૌખ્યં વિરચયતિ યયોશ્ચાપદે રૂપભેદે ।
શમ્ભોસ્સમ્ભાવનીયે પદકમલસમાસઙ્ગતસ્તુઙ્ગશોભે
માઙ્ગલ્યં નસ્સમગ્રં સકલસુખકરે નૂપુરે પૂરયેતામ્ ॥ ૧૭॥

અઙ્ગે શૃઙ્ગારયોનેસ્સપદિ શલભતાં નેત્રવહ્નૌ પ્રયાતે
શત્રોરુદ્ધૃત્ય તસ્માદિષુધિયુગમધો ન્યસ્તમગ્રે કિમેતત્ ।
શઙ્કામિત્થં નતાનામમરપરિષદામન્તરં કૂરયત્ત-
ત્સઙ્ઘાતં ચારુજઙ્ઘાયુગમખિલપતેરંહસાં સંહરેન્નઃ ॥ ૧૮॥

જાનુદ્વન્દ્વેન મીનધ્વજનૃપરસમુદ્ગોપમાનેન સાકં
રાજન્તૌ રાજરમ્ભાકરિકરકનકસ્તમ્ભસમ્ભાવનીયૌ ।
ઊરૂ ગૌરી કરામ્ભોરુહસરસસમામર્દનાનન્દભાજૌ-
ચારૂ દૂરીક્રિયાસ્તાં દુરિતમુપચિતં જન્મજન્માન્તરે નઃ ॥ ૧૯॥

આમુક્તાનર્ઘરત્નપ્રકરકરપરિષ્વક્તકલ્યાણકાઞ્ચી-
દામ્ના બદ્ધેન દુગ્ધદ્યુતિનિચયમુષા ચીનપટ્ટામ્બરેણ ।
સંવીતે શૈલકન્યાસુચરિતપરિપાકાયમાણે નિતમ્બે
નિત્યં નર્નર્તુ ચિત્તં મમ નિખિલજગત્સ્વામિનસ્સોમમૌલેઃ ॥ ૨૦॥

સન્ધ્યાકાલાનુરજ્યદ્દિનકરસરુચા કાલધૌતેન ગાઢં
વ્યાનદ્ધસ્સ્નિગ્ધવર્ણસ્સરસમુદરબન્ધેન પીતોપમેન । var સ્નિગ્ધમુગ્ધઃ
ઉદ્દીપ્રૈસ્સ્વપ્રકાશૈરુપચિતમહિમા મન્મથારેરુદારો
મધ્યો મિથ્યાર્થસધ્ર્યઙ્મમ દિશતુ સદા સઙ્ગતિં મઙ્ગલાનામ્ ॥ ૨૧॥

નાભીચક્રાલવાલાન્નવનવસુષમાદોહદશ્રીપરીતા-
દુદ્ગચ્છન્તી પુરસ્તાદુદરપથમતિક્રમ્ય વક્ષઃ પ્રયાન્તી ।
શ્યમા કામાગમાર્થપ્રકથનલિપિવદ્ભાસતે યા નિકામં
સા મા સોમાર્ધમૌલેસ્સુખયતુ સતતં રોમવલ્લીમતલ્લી ॥ ૨૨॥

આશ્લેષેષ્વદ્રિજાયાઃ કઠિનકુચતટીલિપ્તકાશ્મીરપઙ્ક-
વ્યાસઙ્ગાદુદ્યદર્કદ્યુતિભિરુપચિતસ્પર્ધમુદ્દામહૃદ્યમ્ ।
દક્ષારાતેરુદૂઢપ્રતિનવમણિમાલાવલીભાસમાનં
વક્ષો વિક્ષોભિતાઘં સતતનતિજુષાં રક્ષતાદક્ષતન્નઃ ॥ ૨૩॥

વામાઙ્કે વિસ્ફુરન્ત્યા કરતલવિલસચ્ચારુરક્તોત્પલાયાઃ
કાન્તાયા વામવક્ષોરુહભરશિખરોન્મર્દનવ્યગ્રમેકમ્ ।
અન્યાંસ્ત્રીનપ્યુદારાન્વરપરશુમૃગાલઙ્કૃતાન્સિન્ધુમૌલે- var તાનિન્દુમૌલે-
ર્બાહૂનાબદ્ધહેમાઙ્ગદમણિકટકાનન્તરાલોકયામઃ ॥ ૨૪॥

સન્ભ્રાન્તાયાશ્શિવાયાઃ પતિવિલયભયાત્સર્વલોકોપતાપા- var ભિયા સર્વલોકોપતાપા
ત્સંવિગ્નસ્યાપિ વિષ્ણોઃ સરભસમુભયોર્વારણપ્રેરણાભ્યામ્ ।
મધ્યે ત્રૈશઙ્કવીયામનુભવતિ દશાં યત્ર હાલાહલોષ્મા
સોઽયં સર્વાપદાં નઃ શમયતુ નિચયં નીલકણ્ઠસ્ય કણ્ઠઃ ॥ ૨૫॥

હૃદ્યૈરદ્રીન્દ્રકન્યામૃદુદશનપદૈર્મુદ્રિતો વિદ્રુમશ્રી-
રુદ્દ્યોતન્ત્યા નિતાન્તં ધવલધવલયા મિશ્રિતો દન્તકાન્ત્યા ।
મુક્તામાણિક્યપૂરવ્વતિકરસદૃશા તેજસા ભાસમાન- var માણિક્યજાલ
સ્સદ્યોજાતસ્ય દદ્યાદધરમણિરસૌ સમ્પદાં સઞ્ચયન્નઃ ॥ ૨૬॥

કર્ણાલઙ્કારનાનામણિનિકરરુચાં સઞ્ચયૈરઞ્ચિતાયાં
વર્ણ્યાયાં સ્વર્ણપદ્મોદરપરિવિલસત્કર્ણિકાસન્નિભાયામ્ ।
પદ્ધત્યાં પ્રાણવાયોઃ પ્રણતજનહૃદમ્ભોજવાનસ્યશમ્ભો-
ર્નિત્યં નશ્ચિત્તમેતદ્વિરચયતુ સુખેનાસિકાં નાસિકાયામ્ ॥ ૨૭॥

અત્યન્તં ભાસમાને રુચિરતરરુચાં સઙ્ગમાત્સન્મણીના-

મુધચ્ચણ્ડાંશુધામપ્રસરનિરસનસ્પષ્ટદૃષ્ટાપદાને ।
ભૂયાસ્તાં ભૂતયે નઃ કરિવરજયિનઃ કર્ણપાશાવલમ્બે
ભક્તાલીભાલસજ્જજ્જનિમરણલિપેઃ કુણ્ડલે કુણ્ડલે તે ॥ ૨૮॥

યાભ્યાં કાલવ્યવસ્થા ભવતિ તનુમતાં યો મુખં દેવતાનાં
યેષામાહુસ્સ્વરૂપં જગતિ મુનિવરા દેવતાનાં ત્રયીં તામ્ ।
રુદ્રાણીવક્ત્રપઙ્કેરુહસતતવિહારોસ્તુકેન્દિન્દિરેભ્ય-
સ્તેભ્યસ્ત્રિભ્યઃ પ્રણામાઞ્જલિમુપરચયે ત્રીક્ષણસ્યેક્ષણેભ્યઃ ॥ ૨૯॥

વામં વામાઙ્કગાયા વદનસરસિજે વ્યાવલદ્વલ્લભાયા
વ્યાનમ્રેષ્વન્યદન્યત્પુનરલિકભવં વીતનિશ્શેષરૌક્ષ્યમ્ ।
ભૂયો ભૂયોઽપિ મોદાન્નિપતદતિદયાશીતલં ચૂતબાણે
દક્ષારેરીક્ષણાનાં ત્રયમપહરતાદાશુ તાપત્રયન્નઃ ॥ ૩૦॥

યસ્મિન્નર્ધેન્દુમુગ્ધદ્યુતિતિમિરતિરસ્કારનિસ્તન્દ્રકાન્તૌ var ધુતિનિચય
કાશ્મીરક્ષોદસઙ્ક્લૃપ્તિતમિવ રુચિરં ચિત્રકં ભાતિ નેત્રમ્ ।
તસ્મિન્નુલ્લીલચિલ્લીનટવરતરુણીલાસ્યરઙ્ગાયમાણે
કાલારેર્ભાલદેશે વિહરતુ હૃદયં વીતચિન્તાન્તરન્નઃ ॥ ૩૧॥

સ્વામિન્ ગઙ્ગામિવાઙ્ગીકુરુ તવ શિરસા મામપીત્યર્થયન્તીં
ધન્યાં કન્યાં ખરાંશોશ્શિરસિ વહતિ કિન્વેષ કારુણ્યશાલી ।
ઇત્થં શઙ્કાં જનાનાં જનયદતિઘનં કૈશિકં કાલમેઘ-
ચ્છાયં ભૂયાદુદારં ત્રિપુરવિજયિનઃ શ્રેયસે ભૂયસેનઃ ॥ ૩૨॥

શૃઙ્ગારાકલ્પયોગ્યૈશ્શિખરિવરસુતાસત્સખીહસ્તલૂનૈ-
સ્સૂનૈરાબદ્ધમાલાવલિપરિવિલસત્સૌરભાકૃષ્ટભૃઙ્ગમ્ ।
તુઙ્ગં માણિક્યકાન્ત્યા પરિહસિતસુરાવાસશૈલેન્દ્રશૃઙ્ગં
સઙ્ઘન્નઃ સઙ્કટાનાં વિઘટયતુ સદા કાઙ્કટીકં કિરીટમ્ ॥ ૩૩॥

વક્રાકારઃ કલઙ્કી જડતનુરહમપ્યઙ્ઘ્રિસેવાનુભાવા-
દુત્તંસત્વં પ્રયાતસ્સુલભતરઘૃણાસ્યન્દિનશ્ચન્દ્રમૌલેઃ ।
તત્સેવન્તાં જનૌઘાશ્શિવમિતિ નિજયાવસ્થયાપિ બ્રુવાણં var નિજયાવસ્થયૈવ
વન્દે દેવસ્ય શમ્ભોર્મકુટસુઘટિતં મુગ્ધપીયૂષભાનુમ્ ॥ ૩૪॥

કાન્ત્યા સમ્ફુલ્લમલ્લીકુસુમધવલયા વ્યાપ્ય વિશ્વં વિરાજન્
વૃત્તાકારો વિતન્વન્મુહુરપિ ચ પરાં નિર્વૃતિં પાદભાજામ્ ।
સાનન્દં નન્દિદોષ્ણા મણિકટકવતા વાહ્યમાનઃ પુરારેઃ

શ્વેતચ્છત્રાખ્યશીતદ્યુતિરપહરતાદાપદસ્તાપદા નઃ ॥ ૩૫॥

દિવ્યાકલ્પોજ્જ્વલાનાં શિવગિરિસુતયોઃ પાર્શ્વયોરાશ્રિતાનાં
રુદ્રાણીસત્સખીનામતિતરલકટાક્ષાઞ્ચલૈરઞ્ચિતાનામ્ । var સખીનાં મદતરલ
ઉદ્વેલ્લદ્બાહુવલ્લીવિલસનસમયે ચામરાન્દોલનીના-
મુદ્ભૂતઃ કઙ્કણાલીવલયકલકલો વારયેદાપદો નઃ ॥ ૩૬॥

સ્વર્ગૌકસ્સુન્દરીણાં સુલલિતવપુષાં સ્વામિસેવાપરાણાં
વલ્ગદ્ભૂષાણિ વક્ત્રામ્બુજપરિવિગલન્મુગ્ધગીતામૃતાનિ ।
નિત્યં નૃત્તાન્યુપાસે ભુજવિધુતિપદન્યાસભાવાવલોક-
પ્રત્યુદ્યત્પ્રીતિમાદ્યત્પ્રથમનટનટીદત્તસમ્ભાવનાનિ ॥ ૩૭॥

સ્થાનપ્રાપ્ત્યા સ્વરાણાં કિમપિ વિશદતાં વ્યઞ્જયન્મઞ્જુવીણા-
સ્વાનાવચ્છિન્નતાલક્રમમમૃતમિવાસ્વાદ્યમાનં શિવાભ્યામ્ ।
નાનારાગાદિહૃદ્યં નવરસમધુરસ્તોત્રજાતાનુવિદ્ધં
ગાનં વીણામહર્ષેઃ કલમતિલલિતં કર્ણપૂરાયતાન્નઃ ॥ ૩૮॥

ચેતો જાતપ્રમોદં સપદિ વિદધતિ પ્રાણિનાં વાણિનીનાં
પાણિદ્વન્દ્વાગ્રકૂજત્સુલલિતવિલસત્સ્વર્ણતાલાનુકૂલા ।
var પાણિદ્વન્દ્વાગ્રજાગ્રત્સુલલિતરણિતસ્વર્ણ
સ્વીયારાવેણ પાથોધરરવપટુના નાદયન્તીં મયૂરીં
માયૂરી મન્દભાવં મણિમુરજભવા માર્જના માર્જયેન્નઃ ॥ ૩૯॥

દેવેભ્યો દાનવેભ્યઃ પિતૃમુનિપરિષત્સિદ્ધવિદ્યાધરેભ્ય-
સ્સાધ્યેભ્યશ્ચારણેભ્યો મનુજપશુલસજ્જાતિકીટાદિકેભ્યઃ । var પશુપતજ્જાતિ
શ્રીકૈલાસપ્રરૂઢાસ્તૃણવિટપિમુખાશ્ચાપિ યે સન્તિ તેભ્ય-
સ્સર્વેભ્યો નિર્વિચારં નતિમુપરચયે શર્વપાદાશ્રયેભ્યઃ ॥ ૪૦॥

ઇત્થં ધ્યાયન્ પ્રભાતે પ્રતિદિવસમિદં સ્તોત્રરત્નં પઠેદ્યઃ var ધ્યન્નિત્થં
કિં વા બ્રૂમસ્તદીયં સુચરિતમથવા કીર્તયામસ્સમાસાત્ ।
સમ્પજ્જાતં સમગ્રં સદસિ બહુમતિં સર્વલોકપ્રિયત્વં
સમ્પ્રાપ્યાયુશ્શતાન્તે પદમયતિ પરબ્રહ્મણો મન્મથારેઃ ॥ ૪૧॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
શ્રીશિવપાદાદિકેશાન્તવર્ણનસ્તોત્રં સમ્પૂર્ણમ્ ॥

નીલલોહિતપાદાદિકેશાન્તસ્તોત્રં

Encoded by Rajnarayanan C K krajnara at gmail.com

Proofread by Rajnarayanan C K, PSA Easwaran

*Shri Shiva-PadadikeshAnta Stuti*

pdf was typeset on August 11, 2024

Please send corrections to *sanskrit@cheerful.com*